This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2169

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2169 विषय कर्मकांड

नाव शौचनिर्णय (mss)

लेखक / लिपीकार त्र्यंबक पंडित

पृष्ठ 12 काळ — पूर्ण / अपूर्ण

6912-M

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पर्यंतंभंगनारा॥स्त्रावरूक्यते॥ऋ॥गर्भिण्याःमासत्रयपर्यंतं
त्रिरात्रंचतुर्थमासेचतुरात्रमशौचमस्पृश्यत्वंचपित्रादि
पिंडदानांस्त्रावमात्रस्नानाच्छुद्धिः॥इतिपंचषष्ठमासयोःगर्भनारा॥पातरूक्यते॥तत्रगर्भि
ण्याःमासमसंख्यापंचषट्चदिनानिक्रमेणास्पृश्यत्वंच
दशमाशौचं॥मृतेशौचंतुनास्ति॥इदमेतावत्पर्यंतंसर्ववर्ण
साधारणंवयोबस्थानिमित्तत्वात्॥इतिऋ॥अथगर्भिण्याःस
प्तममासप्रभृतिप्रसवेसर्वेषांमातापित्रादीनांसपिंडानांत्रि
रात्रंदशाहंश्चत्रियाणांद्वादशाहंवैश्यानांपंचदशाहं॥
शूद्राणांमासंमासंशुद्ध्यमासाद्॥ऊनाहरचिगर्भिण्याः

॥१९॥

मृतेशौचंतुनास्तेव॥इति॰सप्तम॥नालछेदात्पूर्वंशिशोर्मृतेमातु
र्दशाहं॥पित्रादिसपिंडानांजननात्त्रिरात्रमाशौचंमृतेशौचंतु
नास्ति॥इत्यष्टमः॥नालछेदादूर्ध्वंशिशुमरणेदशाहंजन्मा
शौचंसर्वेषांसपिंडानामस्ति॥मृतेशौचंतुनास्ती॥इति॰नवमः॥
दशाहानंतरंनामकरणात्प्राक्शिशुमरणेस्नानमात्रेणस
पिंडानांशुद्धिः॥मातापित्रोस्त्रिरात्रं॥पुत्रमृतौ॥कन्यामृतौवैका
हः॥नाम्नःपूर्वंस्वननमेव॥नित्यंनोदकदानादि॥अलंकरणंस
र्वत्रभवति॥इति॰दशम॥नामकरणोत्तरंवर्षत्रयपर्यंतं
शवखननयोःविकल्पः॥इति॰एकादश॥नामोत्तरंदत्तोसतेऽपि
प्राक्चूडपुत्रमरणेएकसपिंडानांएकाहः॥खनेनेतुस्नानाच्छु

॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशाहप्रभृत्यशौचं ॥ पितुःसापत्नमातुश्चस्नानोत्तरमशौचं ॥२
स्नानोत्तरमशौचमेवकिंतुसर्वत्रसपिंडानांकर्मानधिकारमा
त्रेतत्रापिनालछेदप्रभृतिसर्वजातकर्मदानादेःपितुरधिकारः ॥एव
प्रथमषष्ठदशमदिवसेषुजन्मदाक्ष्यदेवलप्रजायांचपितुर्वच
नादधिकारः ॥ इतिचतुर्थशिरः ॥४॥ कृतचूडस्यमरणेत्रिपुरुषसपिंड
यंतंसपिंडः ॥ ततःससोदकाः ॥ ततःसप्तसगोत्राः ॥ सोदका
नांत्रिरात्रमाशौचं ॥ सगोत्राणांस्नानमात्रं ॥ इति० पंच० ॥ ५
भिण्यादशरात्रोत्तरंपुत्रोत्पत्तौमासपर्यंतंकर्मानधिकारः ॥ इति० ६
अथमृतेशौचं ॥ तत्रतद्दत्तमस्पृश्यत्वंकर्मानधिकारश्चेत्य
भयंभवंति ॥ मृतजातेत्रिरात्रं ॥ सर्वेषांसंपिंडानांदशरात्रंजननाशौचं ॥

मातापित्रोरुभयत्रापित्रिरात्रं ॥ इति० दशरात्रं ॥ १० ॥ दंतोत्पतेरूर्ध्वं
वर्षत्रयपर्यंतंपुत्रमरणेदाक्षिखननेवासंपिंडनामेकाहः ॥ मा
तापित्रोस्त्रिरात्रमाशौचं ॥ कन्यामृतौतुत्रिपुरुषसपिंडानांस्नाना
च्छुद्धिः ॥ मातापित्रोस्त्रिरात्रमाशौचं ॥ इति० त्र्योदशा० १३ ॥ अथ
पत्नीवर्षादूर्ध्वंकृतचूडस्यकृतचूडस्यवापुत्रस्यमरणेप्राग्उप
नयनात्पित्रादिसपिंडानांत्रिरात्रमाशौचं ॥ उदकदानादित्र्य
हंच ॥ कृतचूडस्यभ्रातरिपिंडदानंत्र्यहंच ॥ इति० पंचदशीं० ॥ १५ ॥
कन्यायावर्षत्रयानंतरंयाग्दानात्प्राक्कुमरणेत्रिपुरुषसपिं
डानामेकाहः ॥ मातापित्रोस्त्रिदिनंदासेरेकदानादित्र्यहंच ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाद्यनोत्तरं विवाहात्प्राक्मृतसुकन्यासुभर्तृकुलेपितृकुलेस
पुरुषसपिंडानांपित्रादीनांसर्वेषांत्रिदिनमाशौचंसापिंड्यक्र
तादिलुप्तंचेत्॥इति०सप्त०१७७उपनयनोत्तरंमृतस्यपुत्रस्यस
र्वेषांसपिंडानांविप्राणांदशाहंक्षत्रियाणांद्वादशाहंवैश्या
नांपंचदशाहंशूद्राणांमासंसछूद्राणांमासार्द्धं॥सोदक्या
नांत्रिरात्रंगोत्रजानांस्नानाघुद्धिः॥इति०अष्ट०१८८विवा
होर्ध्वंकन्यायाःपितृगृहेमरणेमातापित्रोःसोदरभ्रातुश्च
त्रिरात्रं॥पितृव्यादिनामेकाहः॥इति०एकोनवि०१९६ढुंढायाः
कन्यायाःपितृगृहेप्रसवेमातापित्रोःत्रिरात्रंसोदरस्यैकरा
त्रं॥पितृव्यादीनांएकाहः॥इतिकेचित्॥इतिव्यंबकीयेविरोधः॥२॥

॥३१॥

व्यूढायाःकन्यायाःपतिगृहेप्रसवेपित्रादीनामशौचंनास्ति।
इतिव्यंब०२१६ढुंढकन्यायाःपतिगृहेमरणेमातापित्रोस्त्रिरा
त्रं॥इतिहविं०स्थामातापित्रोर्मरणेव्युढपुत्र्यास्त्रिरात्रं॥इरा
कुंलः॥इराहोर्ध्वंकालांतरेवत्सरांतेपिपक्षिणी॥अत्रैवाति
क्रांतशौचंब्राह्मणवचनात्स्मृतिनान्यत्रा॥इति०त्रयोविं०२०॥
भ्रातृभगिन्योःपरस्परंगृहमरणेपरस्परस्यत्रिरात्रं॥गृहं
स्वरमृतौपरस्परस्यपक्षिणी॥इति०२५॥मातुलमरणेभगि
न्यपत्यस्यपक्षिणी॥उपकारकेमातुलमरणेत्रिरात्रं॥२५॥
मातुलान्यामरणेभगिन्यपत्यस्यपक्षिणी॥इति०२६उप
नीतभागिनेयमरणेमातुलस्यमातुलभगिन्याश्चत्रिरात्रं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुपनीतमृतेलुप्तमातुलस्यमातुलभगिन्याश्चपक्षिणी।२७।
मातामहमरणेदुहित्रपत्यस्यत्रिरात्रं।इति।२८।दौहित्रमर
णेमातामहस्यमातामह्याश्चत्रिरात्रं।अनुपनीतेमृतेलुप्त मा
तामहस्यमातामह्याश्चपक्षिणी।इति।२९।मातामह्यांमृ
तायांदुहित्रपत्यस्यपक्षिणी।इति।३०।श्वश्रूश्वश्वुरयोः
मृतौसत्यांजामातुःसंनिधौत्रिरात्रंअसंनिधौपक्षिणीमा
तामहेचैकरात्रं।इति।३१।जामातरिमृतेलुप्तश्वश्रूश्वशुर
योःस्नानाच्छुद्धिः।एकाहमाक्षौचमितिकेचित्।इति।३२।
शालकेमृतेलुप्तभगिनिभर्तुरेकाहं।शालकसुतमरणे पि
तुस्नानमात्रं।इति।३३।पितृष्वसरिमृतायांभ्रात्रपत्यस्य

॥५॥

मातृष्वसरिमृतायांस्वस्रपत्यस्यपक्षिणी।इति।३४।आत्मनःपि
तृष्वसृमातृष्वसृमातुलपुत्रआत्मबांधवाः।पितुःपितृष्वसृमा
तृष्वसृमातुलपुत्रो [redacted] बांधवाः।मातुःपितृष्वसृमातृष्वसृ
मातुलपुत्रामातृबांधवाः।एतेत्रिविधाबांधवाः।बंधुत्रयं
एतेषुमृतेषुपक्षिणी।मातृष्वस्रादिकन्यानांदत्तानांतुमरणे
एकाहः।इति।३५।दत्तकमृतौपूर्वापरपित्रोस्त्रिरात्रं।स
पिंडानांएकाहः।इति।३६।पूर्वापरपित्रोर्मृतौदत्तकस्य
त्रिरात्रं।इति।३७।दत्तकस्यपुत्रपौत्राणांमरणेजननेवा
सपिंडानामेकाहः।इति।३८।सपिंडेपुत्रीकृतेदत्तकेतुमृ
तेसपिंडानांदशाहएवइति।३९।आचार्यमरणेशिष्यस्यत्रि

पितृ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्पुत्रपत्न्योर्मरणेशिष्यस्यैकरात्रं॥तदुक्तं॥शिष्यस्योपनीतस्य
गुरुःगुरुपनीताध्यापकआचार्यएवोच्यते॥वेदैकदेशाध्या
पकउपाध्यायः॥तन्मरणेशिष्यस्यैकरात्रं॥रति॥१॥शिष्य
स्योपनीतस्यमरणेगुरोस्त्रिरात्रं॥परेपनीतस्यमरणेतद्ध
करात्रं॥साङ्गाध्यायिनोमृतौस्वकग्रामीणयोरन्यत्रानश्रो
त्रिययोर्मृतौचैकाहः॥सांगवेदाध्याय्यन्यत्रानः॥वेदमात्रा
ध्यायीश्रोत्रियः॥अध्ययनरहितार्थस्यार्थज्ञानपर्यवसायि
वंशन्यायसिद्धं॥रति॥४॥असपिंडस्यापिश्रोत्रीयस्यमै
त्र्यादिसंबंधस्ययत्रगृहेमरणेतद्गृहस्थामीनः एकरात्रं॥५॥
वानप्रस्थेयतौबंधेचमृतेयुद्धमृतेचसपिंडानांस्नानं॥इति॥६॥

॥५॥

अथअतिक्रांताशौचं॥तत्रजननेअतिक्रांताशौचंनास्ति
पितुःस्नानंतत्रापिभवति॥मृतकेतुअनुपनीतस्यमरणादि
निमित्तकत्रिरात्रादिषुभगिनीमातुलनिमित्तकत्रिरात्रादि
षुचअतिक्रांताशौचंनास्तिकिंतुदशाहादिमृताहेशौचंवि
धयएव॥रति॥८॥दशाहमध्येजनेनेमरणेवाज्ञातेपुत्रादिनां
सर्वेषांशेषेणशुद्धिः॥संस्कारमपिशेषेणैवसमापयेत्॥अस्थि
पर्णशरसंस्कारमपिशेषेणैवसमापयेत्॥रति॥९॥आधे
त्रिरात्रमध्येसमानोदकमरणेज्ञातेसमानोदकानांशेषेणो
वशुद्धिः॥त्रिरात्रेतिक्रांतेअंतर्दशाहमध्येज्ञातेविनाशौचं
किंतुस्नानमात्रं॥अयमेवन्यायोमातुलादित्रिरात्रेषुद्रष्टव्यः॥इति॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मातापित्रोर्मरणेऽन्यदेशेपिवत्सरानंतरमपिश्रवणेपुनोदशा
स्नादिपूर्णमेवाशौचंकुर्यात्॥इति॥४८॥स्त्रीपुंसोःपरस्पर म
रणेपरस्परस्यदेशांतरेवत्सरांतरेपिपूर्णंदशाहादिभवति॥
इति॥४४॥सपत्नीषुपरस्परमृतासुपरस्परंदेशकालानपे
क्षंदशाहादिपूर्णमाशौचंभवति॥इति॥४५॥सपत्नमातु
र्मरणेसंवत्सरोर्ध्वमपिदेशांतरेपिविदेशेपित्रिरात्रं॥इति॥५१॥
औरसपुत्रेमृतेसंवत्सरोर्ध्वमपिदेशांतरेपिमातापित्रोः
त्रिरात्रं॥इति॥५२॥दशाहोर्ध्वमेकदेशेज्ञातिमरणेश्रुते
मासत्रयपर्यंतंत्रिरात्रं॥षण्मासपर्यंतंपक्षिणी॥नवमास
पर्यंतंएकरात्रं॥तदनंतरंस्नानमितिबोधवसिष्ठः॥श्री

॥६॥

अर्वाक्त्रिपक्षात्त्रिरात्रं॥षण्मासाभ्यंतरेत्रिरात्रं॥अतःसंवत्सरा
पक्षत्रयपर्यंतंत्रिरात्रं॥षण्मासपर्यंतंपक्षिणीवर्षपर्यंतमेक
रात्रं॥तदूर्ध्वंस्नानमितिमाधवदेवस्तौ॥अत्रापदृनापट्टिषयेव
नेव्यवस्था॥इतिसंबंधपक्षेदशाहोर्ध्वंदेशांतरेज्ञातिमरणे
ज्ञातेत्रिपक्षपर्यंतंत्रिरात्रं॥ततःमासषट्कपर्यंतंअहोरात्रं॥
ततोवर्षपर्यंतंदिवाश्रवणेआसायं॥रात्रिश्रवणेआप्तातरा
त्रेचं॥चसदांतेस्नानाशुद्धिः॥इदमतिक्रांतहौचंसर्ववर्ण
साधारणं॥अत्रदेशांतरेज्ञातिमरणेज्ञातेस्नानाशुद्धितिति
केचित्तत्रमाधवोदाहृतप्रज्ञानविलसितमितितेयं॥इति॥५॥
देशांतरंतुब्राह्मणस्यविंशतियोजनात्परं॥क्षत्रियस्य
चतुर्विंशतियोजनात्परं॥वैश्यस्यसप्तषष्टियोजनेभ्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नासरं॥असछ्यषष्ठियोजनात्परंज्ञेयं॥पक्षांतरेतुउक्तं णि
पक्षणसारेणनेतव्यानि॥अथेअंयंनिरूपः॥यानियेक
गोत्रविषयकजननमरणनिरूपितशौचानितान्निजाया
पतिभ्यांउभाभ्यांअविशेषेणानुष्ठेयानि॥यानिपुनर्भ
गिनीमातुलादिभिन्नगोत्रेचारोपितेचानितेषुजायापतिम
ध्येयसंबंधंतत्तुतेनैवानुष्ठेयंनेभाभ्यानि॥इतिश्रा॥
आहिताग्नेर्मंत्रवद्दाहदिनमारभ्यपुत्रादिभिरशौचंका
र्यं॥आहिताग्नौश्रोत्रियेमृतेमंत्रवत्दाहासुर्वंपुत्रा
दिनांआरभ्यचंसंध्यादिकर्मलोपश्चनास्ति॥इति॥५६॥

॥२०३॥

अनाहिताग्नेस्तुमरणदिनमारभ्यपुत्रादिभिरशौचं का
र्यं॥५७॥अथरात्रौजननेमरणेवारात्रौत्रिभागंकृत्वाआद्य
भागद्वयेचेत्पूर्वदिनतृतीयभागेचेदुत्तरदिनमारभ्या
शौचंकार्यं॥अहोरात्रात्पूर्वंपूर्वदिनंपरतःउत्तरदिनं॥प्राक्
सूर्योदयात्सर्वदिनमूर्ध्वमुत्तरदिनमितिपक्षत्रयंदशालोच्य
वस्थितैः॥मेलराष्ट्रदेशेतुआद्यपक्षमेवप्रचरंति॥इति॥५८॥
अथशौचसंपातेनिर्णयः॥तत्रदशाहमृतकेदशाहंततो
न्यूनंवामृतकमुपस्थितंभवतितदशौचेनैवशुद्धिः॥इति५९॥
दशाहस्यमृतकेदशाहंततोन्यूनंवामृतकंपतितदापूर्वशौचे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पैवशुद्धिः॥इति॰६॰॥सूतकमध्येस्राहंन्यूनंवामृतकंपतति
दास्यपूर्वेरौषेणशुद्धिर्नास्ति॥तच्चसूतकस्योवशिष्टंवेतुमृतकं
समाप्यसूतकमपिसमापनीयं॥इति॰६१॥व्यहादिरूपमृतके
सूतकेचदशाहेमृतपातेदशाहेसूतकपातेचपूर्वेणशुद्धिर्न
नास्ति॥इति॥॰६२॥मृतकेसूतकस्यसमस्यन्यूनस्यवासंपा
तेपूर्वेणशुद्धिः॥अधिकस्यापिसूतकस्यशुद्धिरितिशुद्धि
विवेककारः॥इति॰६३॥पूर्वशौचमध्येउपप्लवमपिपूर्वो
शौचोत्तरंज्ञातंचेदुत्तरमपिकार्यं॥इति॰६४॥दशाहा
द्यरात्रौयदिदशाहमाशौचंपतितदादिनद्वयमधिकं
कार्यं॥दशाहाद्यरात्रिचतुर्थयामेयदिदशाहमाशौचं

भवेत्ततस्तदिनत्रयमधिकंकार्यं॥इति॰६५॥व्यहाद्याशौचानां
परस्परंरात्रिशेषेसंपातेपूर्वेणैवशुद्धिः॥नद्यहादिवृद्धिः॥
वर्धितद्वित्रिदिनमध्येआशौचान्तरसंपातेचाधिक
स्यपूर्वेणशुद्धिर्नास्ति॥समन्यूनयोस्तुपूर्वेणशुद्धिर्भव
ति॥६६॥संपिंडशौचेनमातृपितृभर्तृणामाशौचेना
पैतु॥इति॰६७॥मात्राशौचमध्येपित्राशौचंचेत्पूर्वशौचे
नैवशुद्धिः॥पितुःसंपूर्णाशौचेनशुद्धिरित्यन्ये॥तेषांशो
धपदेसंपूर्णलक्षणापत्तिः॥इति॰६८॥पित्राशौचमध्ये
मातुर्मरणेतुपित्राशौचंसमाप्यपक्षिणीमधिकांकुर्यात्॥८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंदशमरात्रेरर्वाग्भवति॥दशमरात्र्योस्तद्रात्रिचतुर्थयामेचमा
रणेतुध्वस्तुश्चलवेवनपक्षिणी॥मृतेभर्त्रासहान्वारोह
णेतुनाधिकापक्षिणि॥इति॥६॥पूर्वोक्तेनशुद्धिः॥सति
कायांअग्निग्रहेप्रेतपुत्रेषुचनास्तिअत्रप्रेतपुत्रेतिपुनर्ग्रह
णंवचनांतरानुरोधेन॥इति॥७॥सूतकेमृतकपातेपिंड
नप्रतिबंधोनास्ति॥मृतकेसूतकसंपातेजातकर्मादिवत्त
र्हीमाशौचांतेवाकुर्यादितिविकल्पः॥इति॥८॥मातर्या
अधिकापक्षिणीतन्मध्येपितुरेकादशाहंश्राद्धंकुर्यात्॥
इति॥७॥रात्रौसूर्यास्तेदिवाचेन्नक्षत्रदर्शनाच्छुद्धिः॥रात्रौ
चेत्सूर्यदर्शनात्॥तदभावानेतत्रैरुवासेवायावत्ते

॥६॥

षांमाशौचंतावदाशौचं॥संसर्गाशौचेकर्मानधिकारोनास्ति॥
स्पृश्यस्पर्शमात्रे॥तत्रद्रव्याणांद्रव्याणांनाशौचसंबंधः॥इति॥७॥
स्नेहेनसवर्णनिर्हारेतदभावानेतत्रैरुवासेचदशाहः॥तदभा
वानेतत्रैरुवासेचत्र्यहः॥त्रैरुवासेअभावेक्षणेनिर्हारमात्रे
कृतेचैकाहः॥इति॥८॥इतिमहेणसवर्णनिर्हारेदाहेच
तत्रैवाशौचंस्नानादिशुद्धिः॥इति॥९॥विजातीयनिर्हारेवि
जातीयदाहेचशवजातीयमाशौचं॥इतिमहेणतुविजा
तीयनिर्हारेदाहेचशवजातीयद्विगुणं॥इति॥१०॥सोद
कनिर्हारेदशाहः॥असपिंडालंकरणेस्नानादुपवासः॥
अशौचेस्नानं॥ज्ञानतःपादकृच्छ्रं॥इतित्र्यंबकीये॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मार्थमनाथसवर्णनिर्हरेक्रियाकरणेग्निदानेचद्विज
स्यानंतयज्ञफलं॥स्नानाछुद्धिः॥प्राणायामोग्निस्पर्श
श्च॥इति०७८॥धर्मार्थमनाथसवर्णनिर्हरासावपिमा
तुलश्वादिसंबंधेसतित्रिरात्रमाशौचं॥इति॥७९॥
अनुगमनेतुसपिंडदोषः॥असपिंडेपिअनाथक्रिया
यांनदोषः॥इति०८०॥समोत्कृष्टवर्णरावानुगमेस्नात्वा
कृताचांस्पृष्ट्वासर्पिःप्राश्यपुनःस्नात्वाप्राणायामंकु
र्यात्॥इति०८१॥हीनवर्णरावानुगमनेश्त्रियेएका
हमाशौचं॥वैश्येपक्षिणी॥शूद्रेत्रिरात्रं॥पूर्ववत्स्नाना

॥१०॥

ब्रह्मचारिणःसपिंडमरणेनाशौचं॥अन्यस्यनिर्हरेदाहा
द्यौर्ध्वदेहिकेअधिकारोनास्ति॥तत्करणेपुनरुपनयनं
कृछ्रश्चप्रायश्चित्तं॥इति०८३॥ब्रह्मचारिणःपितृमा
तृाचार्योपाध्यायमातामहानांअंत्यकर्मकरणेदोषोनास्ति॥
तत्रदशाहमस्पृश्यत्वलक्षणमाशौचं॥दशरात्रेसंध्यान्नि
कार्यादिकर्माधिकारोस्त्येव॥एकादिनमस्पृश्यत्वमितिमा
धवः॥पित्राद्याशौचेप्याशौचिनोब्रह्मचारिनभक्षयेत्॥
भक्षणेपुनरुपनयनं॥इति०८४॥ब्रह्मचारिणःपित्राद्येत
कर्मकरणेतुपित्रादिमरणेपिआशौचंनास्ति॥समावर्त्तनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तरंपर्वमृतानांत्रिदिनमाशौचंकार्यमेवा॥रति०८४॥कृतजीव॥
श्राद्धेनकिमप्याशौचंनकार्यमितिहेमाद्रिः॥वानप्रस्थयतिपति
लैरपिकिमप्याशौचंनकार्यं॥तेषामपितरैर्नकार्यं॥रति०८५॥
परेषांसर्वथानाशौचंकिंत्वेकाहिकंकरणेतुजा॥शौचंकृत्वाकृ
च्छ्रत्रयाच्छुद्धिः॥रति०८७॥हीनवर्णोर्ध्वदैहिककरणेतुशव
जातीयमाशौचंकृत्वाकृच्छ्रत्रयाच्छुद्धिः॥द्वैगुण्यत्रैगुण्यचा
तुर्गुण्यादिप्रायश्चित्तमनुष्ठेयं॥रति०८८॥अनाहिताग्नेरग्नि
दाहेचसर्वसपिंडानांस्नानादाशौचंअनाहिताग्नेस्तुअ
ग्निदाहेपर्णशरदाहेपत्नीपुत्रयोःपूर्वमग्निताद्येत्ययो
र्दशाहादिपूर्णमेवाग्रहीताशौचंयेस्तुतयोरपिसंस्कार

कालेत्रिरात्रंपत्नीसंस्कारेपक्षश्चैवंपत्योर्मिथश्चैवं॥र
ति०८९॥अन्यसपिंडानंतुपूर्वमग्रहिताद्येत्यनाम्नाहिता
ग्निसंस्कारकालेत्रिरात्रंपूर्वंग्रहीताद्येत्यनंतुसपिंडानांसं
स्कारकालेस्नानमात्रंअहंत्रिरात्रादिकंदशरात्रोर्ध्वंसंस्कारकर
णेइयं॥दशरात्रमध्येतुशेषदिवसैरेवाशौचंसीद्देत्स्ववात॥र
ति०९०॥रजस्वलायास्तुयस्याःत्रिंशद्दिनोत्तरंप्रायशो रे
जोदर्शनंभवतितस्याःसप्तदशदिनपर्यंतंपुनःरजोदृष्टौस्ना
नमात्रं॥अष्टादशैकरात्रंनवशैर्द्विदिनंविंशति
प्रभृतिदिनत्रयं॥यस्यास्तुविंशतिदिनादर्वाक्प्रायशोरजो
दर्शनंभवति॥तस्याःदशदिनपर्यंतंस्नानमात्रं॥एकादशो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकरात्रेति॥ द्वादशोदिरात्रेति॥ त्रयोदशोत्रिरात्रेति॥ ॥इतिश्रीत्र्यंबकी
येआन्वीक्षौचनिर्णयेपंचनवतितमोऽध्यायः॥ ९५॥ इति ॥ग्रं॥
अत्रमूलवचनानिमिताक्षरामाधवादिनिबंधेभ्योज्ञेया
नि॥ विस्तरभयात्बालानांदुरधिगमत्वाच्चनलिखिता
नि॥ ॥इतिश्रीआंगिरसमुन्दलकुलजलधिसुधांशु
परवाक्यप्रमाणपारावारी[redacted]णयायज्वक्षि
रोमणिनारायणात्मजरघुनाथसूरिसनुत्र्यंबकपंडि
तविरचितशौचनिर्णयःसमाप्तः॥ ग्रं॥ ७॥ ग्रं॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=11.09.19 11:54
,TRANSFERRED=2019/09/11 at 11:58:22
,PAGES=14
,TYPE=STD
,NAME=S0001742
,Book Name=M-2169-SHOUCHNIRNAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection